International Journal of Sanskrit Research 2023; 9(2): 222-225

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 222-225
© 2023 IJSR
www.anantaajournal.com
Received: 08-12-2022
Accepted: 11-01-2023

**Mrityunjoy Sen**
Research Scholar, Cooch Behar Panchanan Barma University, Behar, West Bengal, India

**Corresponding Author:**
**Mrityunjoy Sen**
Research Scholar, Cooch Behar Panchanan Barma University, Behar, West Bengal, India

# महाकविमाघस्य आयुर्वेदचिन्तनम्

**Mrityunjoy Sen**

**सारांश**
संस्कृतसाहित्ये महाकविमाघकृतस्य शिशुपालवधमहाकाव्यस्य महत्वपूर्णस्थानं विद्यते। महाभारतस्य शिशुपालवधस्य वृत्तान्तमवलम्ब्य विंशतिसर्गात्मकैः सर्गैः महाकाव्यमेतद् रचितम्। दर्शन-व्याकरण-कोश-राजनीति-अर्थशास्त्र-काव्यशास्त्र-अलङ्कारशास्त्र-धर्मशास्त्रादिभिः सह आयुर्वेदशास्त्रेऽपि महाकवेः पाण्डित्यमासीदिति महाकाव्यमेतद् विश्लेष्य ज्ञायते। महाकाव्येऽस्मिन् आयुर्वेदिकप्रयोगानाम् आलोचनमेव प्रबन्धस्यास्य सारः।

**कूटशब्दः** चरकः, रसायनम्, माघः, आरोग्यम्

**प्रस्तावना**

महाकविमाघकृतस्य शिशुपालवधमहाकाव्यस्य संस्कृतसाहित्ये एकं महत्त्वपूर्णं स्थानं वर्तते। माघः प्रायः अष्टमशताब्द्याः कविः इति मन्यते। महाकाव्यमेतद् माघकाव्यम् इति नाम्ना अपि प्रसिद्धमस्ति। महाभारतस्य सभापर्वान्तर्गतां श्रीकृष्णद्वारा शिशुपालवधकथाम् अवलम्ब्य महाकाव्यमेतद् रचितम्। विंशतिसर्गात्मकं शिशुपालवधम् वृहत्त्रय्याः अन्तर्गतमस्ति। महाकाव्येऽस्मिन् १६२५ संख्यकाः श्लोकाः सन्ति। महाकविमाघः अनेकेषु शास्त्रेषु पारङ्गमः आसीत्। संस्कृतसाहित्ये उल्लिखितं यत्
उपमा कालिदासस्य भारवेरर्थगौरवम्।

दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।

यथा वेद-पुराण-दर्शन-व्याकरण-कोश-राजनीति-अर्थशास्त्र-काव्यशास्त्र-अलङ्कारशास्त्र-धर्मशास्त्र-कामशास्त्रादिषु माघः विदग्धः आसीत्, तथैव आयुर्वेदशास्त्रेऽपि तस्य विदग्धतायाः लक्षणानि अवलोक्यते। महाकाव्यस्य प्रायेषु सर्गेषु आयुर्वेदिकसिद्धान्ताः परिलक्ष्यन्ते।
संस्कृतसाहित्ये काव्यपाठस्य फलविषये कथ्यते – 'चतुर्वर्गफलप्राप्तिसुखादल्पधियामपि।'[1] इति। एतेषां चतुर्णां वर्गानां कृते प्रधानो विषयः वर्तते आरोग्यम्। तत्र उच्यते यत् – 'धर्मार्थकाममोक्षनामारोग्यं मूलमुत्तमम्।'[2] इति।
आयुर्वेदस्य लक्षणं चरकसंहितायां परिलक्ष्यते –

'हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्वेदः सः उच्यते।।'[3]

शरीर-इन्द्रिय-मन-आत्मनां संयोगम् आयुरिति उच्यते।[4] आयुर्वेदस्य मुख्योद्देश्यं वर्तते – 'प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनम्।'[5] सुश्रुतसंहितायामपि एवमेवोक्तम्।[6] आयुर्वेदस्य अष्ट मुख्याः अङ्गाः सन्ति। शल्यतन्त्रं, शालक्यतन्त्रं, कायचिकित्सा, भूतविद्या, कुमारभृत्यः अगदतन्त्रं, रसायनतन्त्रं वाजीकरतन्त्रञ्च। एतेषां शाखानां विविधाः प्रयोगाः शिशुपालवधमहाकाव्ये दृश्यन्ते । आयुर्वेदस्य प्राचीनाः प्रसिद्धाः ग्रन्थाः सन्ति चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयः, अष्टङ्गसंग्रहः, रसरत्नसमुच्चयः चेत्यादयः।

शिशुपालवधमहाकाव्यस्य द्वितीयसर्गे औषधवृक्षस्य परिचयं परिलक्ष्यते। तन्मतानुसारेण मन्त्ररत्नौषधज्ञ इव शत्रुगुह्यवित् राजा शत्रुं सहजतया वशीकर्तुं शक्नोति –

'तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः।।'[7]

आयुर्वेदाचार्यस्य चरकस्य मते - उपेक्षितः रोगः मरणस्य हेतुः भवितुमर्हति। यः पूर्वमेव तरुणावस्थायां वा औषधं सेवते सः शाश्वतसुखं भोक्तुं शक्नोति अर्थात् स्वल्पायासेनैव तरुणवृक्षस्य किञ्चित् छेत्तुं शक्यते परन्तु अतिवृद्धे सति तस्य छेदने काठिन्यं भवति, तथैव तरुणरोगस्य निरामयं अनायासेन भवति किन्तु वर्द्धिते सति कठिनम् असम्भवं वा भवति।[8]

महाकाव्येऽस्मिन् उक्तं यत् ज्ञानिभिः कदापि वर्धमानशत्रवः रोगाश्च न उपेक्षन्ते।[9] अर्थात् यथा गुप्तरोगैः शरीरस्य हानिः भवति तथैव उपेक्षिताः शत्रवोऽपि अनिष्टं साधयति।[10] चरकसंहितानुसारं ज्वरकाले दिवानिद्रा, स्नानं, मैथुनं, क्रोधः, व्यायामम्, अन्नसेवनं च अनुचितमिति।[11] अस्य निदर्शनम् शिशुपालवधमहाकाव्ये परिलक्ष्यते। महाकविमाघस्य मतानुसारं ज्वरे स्वेदः निःसरेदिति।[12] आयुर्वेदशास्त्रानुसारं रसायनौषधं संयमेन ध्यानेन च सेवनीयम्। मनुष्याणां दीर्घायुः, स्मृतिः, बुद्धिः, आरोग्यम्, यौवनं, तेजः, वर्णस्य स्वरस्य च पोषणं, शरीरिन्द्रियाणां बलं, वाक्, सफलता इत्यादयः रसायनशास्त्रात् उपलभ्यन्ते। रसादिधातवः प्राप्यते इत्यस्मात् कारणात् अस्य नाम रसायनम् इति।[13] महाकवेः माघस्य मते रसायनेन शरीरं बलवत् भवति। अतः यथासामर्थ्यं रसायनस्य सेवनं करणीयम् –

'षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायणम्।
भवन्त्यसैवमङ्गानि स्थास्नुनि बलवन्ति च।।'[14]

शरीरस्य स्वस्थतायै आयुर्वेदशास्त्रस्य उपदेशः सदा अनुसरणीयः। आयुर्वेदे उच्यते यत् बलानुरूपं व्यायामेन शरीरस्य लाभः भवति। आचार्यवाग्भटेन उक्तं यत् यया क्रियया शरीरस्य श्रमः भवति तत् कार्यं व्यायामः इति उच्यते। व्यायामेन शरीरः लाघवः भवति तथा च कार्ये उत्साहः वर्धते, शरीरस्य मेदक्षयं भवति, शरीरस्य प्रत्यङ्गं परिपुष्टं भवति।[15] महाकविना माघेनापि राजशक्तेः समृद्धिविषये उक्त-आयुर्वेदसिद्धान्तः उल्लिखितः। तन्मते स्वीयसामर्थ्यानुसारेण व्यायामेन शरीरस्य सम्यक्तया वृद्धिर्भवति। किन्तु असम्यक्तया कृते सति व्यायामः क्षयरोगस्य कारणं भवति।[16]

आयुर्वेदे यक्ष्मा रोगाधिराज इति उच्यते –
'अनेकरोगानुगतो बहुरोगपुरोगमः।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः।।'[17]

अनेकचरयुक्तः राजा इव यक्ष्मारोगेन शरीरे विविधरोगाः जायन्ते। यथा- श्वासकासज्वरादयः। अस्य यक्ष्मारोगस्य चत्वारि नामानि सन्ति - राजयक्ष्मा, क्षयः, शोषः, रोगराड्। सर्वप्रथमं नक्षत्राणां ब्राह्मणानां च राज्ञः चन्द्रस्य अयं रोगः अभवत् तथा च सर्वरोगाणां राजा अतः एषः रोगः राजयक्ष्मा इति नाम्ना प्रसिद्धः अस्ति।

महाकविः माघः अस्मिन् विषये अवगतः आसीत् इति प्रमाणम् महाकाव्येऽस्मिन् दृश्यते । महाकाव्ये शिशुपालस्य नेतृत्वं राजयक्ष्मया सह तुल्यं भवति – 'रोजयक्ष्मेव रोगाणां समूहः स महीभृताम्।' [18] यथा राजयक्ष्मा विविधरोगाणां समूहः तथा शिशुपालोऽपि अनेकानां राज्ञां समूह एव।

राजयक्ष्मया शरीरस्य क्षयः भवतीत्यनेन कारणेन एषः क्षयरोगः इत्युच्यते। अस्मिन् रोगे स्वरविकृतिः, रक्तकफः, ज्वरः, अतिसारः इत्यादयः दृश्यन्ते।[19]

उपमालंकारेण क्षयरोगाक्रान्तस्य चन्द्रस्य वर्णना अस्मिन् महाकाव्ये परिलक्ष्यते।[20] आयुर्वेदशास्त्रे स्मृतिबुद्धिसत्तादिलोपत्वात् विभत्सचेष्टया सह अज्ञानावस्था एव अपस्मार इति उच्यते। [21] इति। द्वारकापुरीवर्णयन् महाकविमाघः समुद्रस्य महातरङ्गैः सह अपस्माररोगस्य सादृश्यमदर्शयत्। [22]

महाकविना सुचारुरूपेण अस्मिन् महाकाव्ये श्लेषालंकारेन ज्वररोगस्य लक्षणं प्रदत्तम्।[23] तस्य मते ज्वरादिरोगेन यदा हस्तपादसन्धिषु असारता जायते, नेत्रज्योतिः क्षीणा च भवति तदा निपुणाः वेद्याः आदौ उपवासेन रोगं चिकित्सन्ति।[24]

महाकाव्येऽस्मिन् दृष्टान्तालंकारैः आयुर्वेदोक्तपथ्यपालनं[25] सुचारुरूपेण प्रस्फुटितमस्ति। तस्य मते पथ्यग्रहणेन आरोग्यं लभ्यते।[26]

आयुर्वेदे षड्रसान्वितं भोजनं उत्तमभोजनमिति उच्यते। [27] अस्मिन् महाकाव्ये परिलक्ष्यते यत् कृतराजसूययागः राजा युधिष्ठिरः एतादृशेन उत्तमभोजनेन अतिथिभ्यः सत्कारं कृतवान्।[28]

आयुर्वेदशास्त्रे प्राणीनां स्वस्थस्योपरि उत्तरायणस्य दक्षिणायनस्य च प्रभावः वर्णितोऽस्ति।[29] उत्तरायणे पशूनां बलं न्यूनं भवति, दक्षिणायने च स्वाभाविकतया बलं वर्धते। महाकाव्यस्यास्य तृतीये सर्गे उत्तरायणस्य दक्षिणायनस्य च प्रयोगमस्ति।[30]

अपि च तृतीयसर्गे अपि आयुर्वेदिकानाम् अष्टधातूनां प्रयोगं विद्यते।[31] अस्मिन् महाकाव्ये रैवतकपर्वतस्य वर्णनायां प्राप्यते यत् तस्मिन् पर्वते औषधीनाम् उपलब्धतायाः कारणेन रैवतकपर्वतः महौषधि इति उच्यते।[32] आयुर्वेदे गन्धक-हरिताल-गैरिकादयः अष्ट उपरसाः विद्यन्ते –

गन्धाश्मगैरिकासीसकाङ्क्षीतालशिलाञ्जनम्।
कङ्कुष्ठं चेत्युपरसाश्चाष्टौ पारदकर्म्मणि।।[33]

सुवर्ण-रजत-मानसिला-गौरिक-हरतालादीनां धातुनां विषये कविमाघस्य पाण्डित्यम् चतुर्थे सर्गे परिलक्ष्यते। हरताल इति धातोरुल्लेखं कृतं तेन अस्मिन् काव्ये।[34]

महाकाव्यस्य षष्ठे सर्गे षड्ऋतूनां वर्णना परिलक्ष्यते। अत्र ऋतुनां वर्णयता महाकविना आयुर्वैदिकस्य वाजीकरणतन्त्रस्य विषयान् आलोचितम्। वर्षा[35], शरद्[36], हेमन्तः[37], शीतः[38], वसन्तः[39], ग्रीष्मः[40] इति एतासाम् ऋतुणां वर्णनमस्ति।

आयुर्वेदे यथायथरूपेण मद्यपानं शरीरस्य कृते हितकारकं भवति।[41] महाकविमाघः महाकाव्यस्य दशमे सर्गे मद्यपानस्य विषये उल्लेखं कृतवान्।[42]

आयुर्वेदे कोशातकी, पटोलपुष्पम् इत्यादीनाम् औषधवृक्षाणाम् उल्लेखम् अस्ति।[43] अस्मिन् महाकाव्ये उपमारूपेण कोशातकी, पटोलपुष्पम्, लौध्रः इत्यादीनाम् औषधवृक्षाणां नामोल्लेखं परिलक्ष्यते।[44] यम-नियमादीनाम् अष्टाङ्गयोगानां वर्णनमस्ति अस्मिन् महाकाव्ये।[45]

उपमालङ्कारेण महाकाव्येऽस्मिन् आयुर्वेदस्य अपूर्वनिदर्शनम् अवलोक्यते। माघेन उक्तं यत् कुपथ्यग्रहणेन ज्वरः वर्धते।[46]

आयुर्वेशास्त्रे रोगस्य आरोग्यस्य विषये वर्णना अस्ति।[47] महाकवेः माघस्य आयुर्वेदशास्त्रदृष्ट्या वर्णनशैल्याः निदर्शनं महाकाव्यस्य अन्तिमेऽपि उपलभ्यते। तद्यथा-

'इतिनरपतिरस्त्र यद्यदाविश्चकार प्रकुपित इव रोगः क्षिप्रकारी विकारम्। भिषगिव गुरुदोषच्छेदिनोपक्रमेण क्रमविदथ मुरारिः प्रत्यहस्तत्तदाशुः।।' [48]

वैद्येन सह भगवतः श्रीकृष्णस्य सादृश्यं, तथा च रोगेन सह शिशुपालस्य शस्त्राणां, महता औषधेन सह भगवतः श्रीकृष्णस्य शस्त्राणां च सादृश्यं दर्शयति महाकविमाघः ।

महाकाव्यस्य दशमे सर्गे आयुर्वेदान्तर्गतस्य वाजीकरणतन्त्रस्य विषयाः यथा रतिमिलनकालीकः शीत्कारस्वरः, प्रसादवचनः, मधुरभाषा, निषेधवचनं, हास्यध्वनिः इत्यादीनां वर्णना अस्ति।[49]

सुश्रुतसंहितायां सांख्यदर्शनस्य पञ्चविंशतितत्तानाम् प्रयोगः अस्ति। तत्र उच्यते यत् अव्यक्ताद् बुद्धेः महतः वा सृष्टिरभवत्, महतः अहङ्कारः, अहङ्कारात् एकादश इन्द्रियाणां पञ्चतन्मात्रानाञ्च सृष्टिरभवत्, एकादशेन्द्रियेभ्यः पञ्चतन्मात्रेभ्यश्च पञ्चमहाभूतानि असृजन्। एतानि चतुर्विंशतिः तत्वानि अचेतनानि, पुरुषः भवति पञ्चविंशतितमं तत्त्वम् –'तत्र सर्व्व एकचेतन एष वर्गः पुरुषः पञ्चविंशतितमः।'[50]

शिशुपालवधमहाकाव्येऽपि पञ्चतन्मात्र-अहङ्कारादिभिः चतुर्विंशतितत्त्वैः सह पञ्चविंशतितत्त्वरूपेण परमपुरुषस्य उल्लेखः अस्ति ।[51]

आयुर्वेदे कूटजपुष्पस्य औषधीगुणं परिलक्ष्यते।[52] अस्मिन् महाकाव्ये माघः निर्झरस्य सूक्ष्मोज्ज्वलकणाभिः सह मौक्तिकस्य सादृश्यं दर्शयति, तथा च कूटजपुष्पस्य परागकणानाम् उल्लेखः अस्ति।[53]

आयुर्वेदशास्त्रे सत्तं, रजः, तमश्च एते त्रयः गुणाः महागुणाः इति कथ्यन्ते - सत्त्वं रजस्तमश्चेति त्रयः प्रोक्ताः महागुणाः।[54] अस्मिन् महाकाव्येऽपि एते त्रयः गुणाः उल्लिखिताः सन्ति ।[55]

उपसंहारः - महाकविमाघः काव्यग्रन्थप्रणयनेऽपि अतीव सुचारुतया आयुर्वेदस्य निदर्शनानि उपस्थापितवान्। माघस्य ग्रन्थमिदं समीक्षणेन वक्तुं शक्यते यत् स आयुर्वेदशास्त्रवित् आसीत् इति।

## परिशीलिता ग्रन्थानुक्रमणी

चरकसंहिता, सम्पा- कविराज यशोदानन्दन सरकार, तृतीयसंस्करणम्, कलकाता, वङ्गवासी कार्यालय, १३३०।

सुश्रुत-संहिता, सम्पा- कविराज यशोदानन्दन सरकार, द्वितीयसंस्करणम्, कलकाता, वङ्गवासी इलेक्ट्रो-मेशिनयन्त्रम्, १३१८।

अष्टाङ्गसंग्रह, सम्पा-कविराज अत्रिदेव गुप्त, वम्बइ, निर्णयसागर मुद्रणालयप्रकाशन, २००७ ।

अष्टाङ्गहृदय संहिता, सम्पा-कविराज विनोदलालसेन महाशय, तृतीयसंस्करणम्, कलिकाता १३३९।

शिशुपालवध-महाकाव्यम्, सम्पा-डा.गजाननशास्त्री मुसलगाँवकर, द्वितीयसंस्करणम्, वारानसी,चौखम्बा संस्कृत भवन, २००६।

साहित्यदर्पणम्, सम्पा-विमलाकान्तमुखोपाध्याय, कलकाता, संस्कृत पुस्तक भाण्डार। १३६७ वङ्गाब्दः।
कुमारसम्भवम्, सम्पा- वासुदेवशर्मा, द्वादशसंस्करणम्, वम्बइ, निर्णयसागरमुद्रणयन्त्रालय, १९३५,।

## संदर्भ

1. साहित्यदर्पणः१/२
2. चरकसंहिता सुत्र. १/५
3. तत्रैव १/ १५
4. तत्रैव १/ १६
5. तत्रैव ३०/१५
6. सुश्रुतसंहिता. सूत्र १/१२
7. शिशुपालवध-महाकाव्यम् २।८८
8. चरकसंहिता निदान. ५.२३-२४
9. शिशुपालवध-महाकाव्यम् २.१०
10. तत्रैव २.८६
11. चरकसंहिता चिकित्सा. ३.१३९
12. शिशुपालवध-महाकाव्यम् २।५४
13. चरकसंहिता चिकित्सा.१.६
14. शिशुपालवध-महाकाव्यम् २/९३
15. अष्टाङ्गसंग्रहः सूत्र ३/६२-६३
16. शिशुपालवध-महाकाव्यम् २/९४
17. अष्टाङ्गहृदय निदान.५/१
18. शिशुपालवध-महाकाव्यम् २/९६
19. सुश्रुतसंहिता उत्तर. ४१/३-५
20. शिशुपालवध-महाकाव्यम् १३/२९
21. चरकसंहिता निदान. ८/४
22. शिशुपालवध-महाकाव्यम् ३/७२
23. तत्रैव १२/२५
24. चरकसंहिता चिकित्या. ३/२४
25. अष्टाङ्गहृदय संहिता पृष्ठाङ्कः १९-२०
26. शिशुपालवध-महाकाव्यम् १४/१३
27. चरकसंहिता विमान. १/३
28. शिशुपालवध-महाकाव्यम् १४/५०
29. अष्टाङ्गहृदय संहिता सूत्र. पृष्ठाङ्कः-१४
30. शिशुपालवध-महाकाव्यम् ३/१
31. तत्रैव ३/२८
32. तत्रैव ४/३४
33. रसरत्नसमुच्चयः३/१
34. शिशुपालवध-महाकाव्यम् ४/२१
35. तत्रैव ६.३८/६.४०,
36. तत्रैव ६.४४
37. तत्रैव ६.५८
38. तत्रैव ६.५७
39. तत्रैव ६.६
40. तत्रैव ६.२२
41. चरकसंहिता चिकित्सा. १२.१
42. शिशुपालवध-महाकाव्यम् १०.१-३८
43. द्रव्यगुण पृष्ठाङ्कः ३५२,१३,८०
44. शिशुपालवध-महाकाव्यम् १२/३७,६/६४,१०/३१
45. तत्रैव १३.२३
46. तत्रैव १५.२
47. अष्टाङ्गसंग्रहः सूत्र.१.४३
48. शिशुपालवध-महाकाव्यम् २०/७६
49. तत्रैव १०.७५
50. सुश्रुतसंहिता शारीर.१-५
51. शिशुपालवध-महाकाव्यम् १५.२
52. द्रव्यगुण पृष्ठाङ्कः-१५५
53. शिशुपालवध-महाकाव्यम् ६.३५
54. अष्टाङ्गसंग्रहः सूत्र १/४१
55. शिशुपालवध-महाकाव्यम् १५.३२